**International Research Journal of Human Resource and Social Sciences**
**ISSN(O): (2349-4085) ISSN(P): (2394-4218)**
**Impact Factor 6.924 Volume 9, Issue 10, October 2022**
**Website**- www.aarf.asia, **Email** : editoraarf@gmail.com

# वाग्भेदविवृतिः

**डॉ. नन्दकिशोर तिवारी**
सहायकाचार्यः, व्याकरणविद्याशाखा
केन्द्रीयसंस्कृतविश्वविद्यालयः, भोपालपरिसरः

**सारांश:-**

अस्मिन् शोधपत्रे अयं विचार: प्रस्तुतो यत् वाक्तत्वमाश्रित्य लोकव्यवहारे स्वयं शिक्षितुं शक्यते परान्नपि शिक्षयितुं शक्यते। तस्या वाचः परापश्यन्तीमध्यमावैखरीभेदेन चत्वारो भेदा: भवन्ति। अत्र व्याकरणविदुषां मध्ये एव वाचस्त्रयो भेदा: भवन्ति पराया वाच: सत्ता नास्तीति मतमासीत्। व्याकरणशास्त्रे पराया: सत्ता तन्त्रवासनया कैश्चित्स्वीकृता इति कथनन्तेषामासीत्। किन्तु अत्र शोधनिबन्धे प्रमाणपुरस्सरं महाभाष्यकारस्य मतेन अथ च वाक्यपदीयकारस्य मतेनापि परा-पश्यन्ती-मध्यमावैखरीति चत्वारो भेदा: भवन्तीति प्रतिपादितम्।

**कूटशब्दा:-** अनेकतीर्थभेदा,बुद्धिमात्रग्राह्या, स्वरूपज्योति,वागनपायिनी

**प्रस्तावना -**

अस्मिन् संसारे नानाविधा: प्रत्येकं भिन्ना: प्राणिनो निवसन्ति। तेषु केचन मृगादय: समूहमाकलय्य व्यवहरन्ति, केचँश्चैकाकिन एव तिष्ठन्ति। समूहं निर्माय जीवनभृतां मध्ये मनुष्या: अपि वर्तन्ते। पृथिव्यां वसतां मनुष्याणां निवासाय देशजनपदादीनां परिकल्पना तैरेव मानवै: कृता यतो हि अन्येषां प्राणधारिणामपेक्षया मानवा ज्ञानसम्पन्ना अथ च मनसा अचिन्त्यचिन्तने पद्भ्यां वा यानादिसाधनमुपेत्य परिकल्पितस्थानं प्राप्तुं सामर्थ्यवन्तो बाहुभ्यां किमपि साधने च समर्था भवन्ति। मानवानामपेक्षया इतरे प्राणिनस्तथा सामर्थ्यवन्तो न भवन्ति। तथापि रागादीनामनुभव: भयप्रीत्यादिभावानां प्रदर्शनं तेऽपि कुर्वन्ति।

© **Associationof Academic Researchers and Faculties (AARF)**
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

ते च मानवैर्दुस्साध्यं कार्यमपि साधयन्ति। परन्तु अत्र प्रश्न उत्तिष्ठति यन्मानवेतरप्राणिन: कथंसमूहमाकलयन्ति तेषां समूहनिर्माणे पक्षिणां नीडादिनिर्माणे अन्याँश्चासाध्यसाधने प्रेरणाप्रदाता शिक्षकश्च क:? कस्य निर्देशपरायणं भूत्वा तेषु मध्यत एवागत्य केचन च ते तेषां वचनमनुकुर्वन्ति अनुहरन्ति च । मनुष्य अपि प्रयोजनवाशत् अत्र तान् पशून् गृहे पालयन् स्वसान्निध्यं प्रापयति शिक्षयति च। अस्य प्रश्नस्योत्तररूपेण एतद्वक्तुं शक्यते यत् जगति आमानवा तदितरे च प्राणिनो वाक्तत्त्वमाश्रित्यैव परस्परं सान्निध्यमनुभवन्ति। वाक्तत्वमाश्रित्यैव मानवा: शुकादिनां पक्षिणां गोगजशुनकादीनां पशूनां प्रशिक्षणं सम्पादयन्ति ते मानवेतरप्राणिन: वाक्तत्वमाश्रित्यैव प्रशिक्षणं गृह्णन्ति।

प्रतिपाद्यविषय: -

उच्यतेऽनया अथवा उच्यतेऽसौ इति विग्रहे वाक्शब्दस्य निष्पत्तिर्भवतीति बोध्यम्। तत्र उच्यतेऽनया इत्यस्य तात्पर्यं शब्दोच्चारणानन्तरं प्रकाश्यविषयेण इत्यर्थस्तथा च उच्चारितेऽसौ इत्यस्य ध्वन्यात्मकशब्दानामुच्चारणानन्तरं प्रकाश्यविषयोऽर्थ: गृह्यते इति बोध्यम्। यतो हि महाभाष्ये भगवान भाष्यकार: अथ शब्दानमनुशासनम्[1] इति प्रतिज्ञानन्तरं केषां शब्दानामिति प्रश्ने द्रव्यस्य गुणस्य क्रियाया: आकृतेश्च शब्दत्वमाशङ्क्य तेषां शब्दत्वप्रत्याख्यानं कृतवान्। तदनन्तरन्तैर्निगदितं यत् येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्द:[2] इति शब्दस्य स्वरूपं प्रतिष्ठापितम्। अत्रापि उचारितेन इत्यस्य ध्वान्यात्मकशब्देन प्रकाशिते इत्यर्थ एवास्ति इति महाभाष्य व्याख्याकर्तुराचार्यस्य कैयटस्य मतमस्ति। तथा च तत: परं अथवा प्रतीतपदार्थको लोके ध्वनि: शब्द: इत्येवं रूपेण यश्शब्दस्य लक्षणं निगदितं भाष्यकृता तेनापि वाक्शब्दस्य पूर्वोक्त एवार्थ लभ्यत एव। अयमर्थ तपरस्तत्कालस्य[3] इति भाष्यग्रन्थेनापि परिपोषं गच्छति। यतो हि तत्रोक्तम्- एवं तर्हि स्फोट: शब्द: ध्वनि: शब्दगुण:। कथम्? भेर्याघातवत्। तद्यथा भार्याघातो भेरीमाहत्य कश्चिद् विंशति पदानि गच्छति कश्चित्त्रिंशत् कश्चिच्चत्वारिंशत्। स्फोटस्तावानेव भवति ध्वनिकृता वृद्धि[4]रिति।

---

[1] महाभाष्ये पस्पशाह्निके

[2] तत्रैव महाभाष्ये शब्दस्वरूपनिर्वचनप्रकरणे।

[3] पाणिनीयं सूत्रम् -1.1.70।

[4] तपरस्तत्कालस्य इति सूत्रस्य महाभाष्यम्।

© Associationof Academic Researchers and Faculties (AARF)

तत्र प्रयत्नवशादुत्पन्नं भेरीशब्दं कश्चिच्छ्रोता अल्पकालमुपलभते कश्चिच्चिरं कश्चिच्चिरतरञ्च। योऽल्पकालमुपलभते स विंशति पदानि गच्छति यश्चिरं स त्रिंशत् पदानि यश्चिरतरं स चत्वारिंशत् पदानि गच्छति। तत्र श्रोतृषु ध्वनिभेदसामर्थ्यवशादेव तस्य तत्तद्रूपेण ग्रहणं भवति। यतो हि ह्रस्वदीर्घप्लुता: शब्दस्य कालकृतभेदा: ध्वनौवेव सम्भवन्ति, ध्वनिद्योते स्फोटरूपे शब्दे तन्न भवति। महाभाष्ये भगवता पतञ्जलिना येनोच्चारितेन इत्यादि शब्दस्य प्रथमलक्षणेन आन्त: प्रणवरूपस्य शब्दस्य लक्षणमुक्तं तथा च प्रतीतपदार्थक इति द्वितीयदलेन ध्वने: शब्दत्वमङ्गीकृतम्। अग्रे च ध्वनि: स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। अल्पो महाँश्च केषांञ्चिदुभयं तत्स्वभावत:।[5] इति यदुक्तं तेन ध्वनिव्यङ्ग्यत्वे सत्यर्थविषयकप्रमाकरणत्वरूप: स्फोट: शब्द इति प्रतिपादित: भाष्यकृता।

**तत: परं "उत त्व: पश्यन्न ददर्श वाचमुत त्व: श्रृण्वन्न शृणोत्येनाम्।**

**उतो त्वस्मै तन्वं विसस्रे जायेव पत्ये उशती सुवासा:।।**[6] इति मन्त्रमुपन्यस्य भाष्यकारो या वाग्रूपा चिच्छक्ति: भगवती शब्दब्रह्मराशिर्वेदस्वरूपा वर्तते तस्या एव प्रतिपादनं कृतम्। सा च वाग्रूपा भगवती प्रसन्ना सती प्रपन्नाय स्वस्वरूपमुन्मीलयति,परन्तु केवलं श्रोत्रेण चक्षुषा वा केनचिदपीन्द्रियेण वा तस्या: साक्षात्कार: कथमपि भवितुं नैवार्हति। यथोक्तम् श्वेताश्वतरोपनिषदि- यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्येते कथिता ह्यर्था: प्रकाशन्ते महात्मन:।।[7] एतदनुसारं यतो हि एतस्या: वाच: पश्यन्तीरूपेण स्थितत्वात् सा वाग् न तु अन्यैरिन्द्रियै: साक्षात्कर्तुमर्हा न चापि मन:संवेद्या अस्ति। वेदलक्षणाया वाग्देव्या: प्रसादं सनातनतया वेदविद्भि: काम्यते, परम् अनेन मन्त्रेण प्रसिद्धेभ्यो वेदेभ्योऽन्यो वेदो नास्तीति अपितु चिद्रूपा सरस्वती एव प्रसिद्धानां वेदानामधिष्ठात्री वाचो देवता उच्यते। श्रीदुर्गासप्तशत्याम्-

**शब्दात्मिका सुविमलर्ग्यजुषां निधानमुद्गीथरम्य पदपाठवतां च साम्नाम्।**

**देवी त्रयी भगवती भवभावनाय वार्ता च सर्वजगतां परमार्तिहन्त्री।।**[8]

उपरोक्तवेदमूलकभाष्यकारीयवचनाद् श्रीदुर्गासप्तशतीवचनाच्च वाग्रूपतामापन्ना चिद्रूपिणी भगवती सरस्वत्येव प्रतिपादिता अस्ति। अमुं मन्त्रं व्याख्यायन् श्रीनागेशभट्टोऽब्रवीत् यत् –शब्दात्मिका शब्द: आत्मा यस्या सा शब्दात्मिका, आत्मा  स्वरूपं शब्दब्रह्मरूपा उद्गीथेन भक्तिविशेषेण रम्य: मनोहर: साम्नां

---

[5] तत्रैव तपरस्तत्कालस्य इति सूत्रस्य महाभाष्यम्।

[6] महाभाष्ये व्याकरणध्ययनप्रयोजनविवरणावसरे।

[7] श्वेताश्वतरोपनिषद्-6.23।

[8] दुर्गासप्तशती 4.10।

© Associationof Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

सामवेदशाखानां देवी द्योतनशीला भगवती भगवद्विषया त्रयी वेदत्रयी वार्ता  सा वेदत्रयी वार्ता कृषि: पशुपालनरूपा भवतीति भाव:,भावानां भावनं तस्मै भवभावनाय भवानां प्राणिनां भावनं जीवनं सर्वाणि च तानि जगन्ति सर्वजगन्ति तेषां सर्वजगतां सर्वाणि समस्तानि जगन्ति चतुर्दशलोका: परमाश्चासौ आर्तिश्च परमार्ति: परमार्ते: हन्त्री परार्तिहन्त्री परमा उत्कृष्टा आर्ति: पीडा हन्त्री नाशकर्त्री[9] इति। अनेन नागेशभट्टवचनेन सिद्धं भवति यत् सर्वजगतां जनयित्री पोषणकर्त्री सञ्चालिका वेदत्रय्या: अन्यासां लोकविद्यानां शिल्पादिकलानां प्रकाशिका सर्वदा सर्वत्र व्यापनशीला चिच्छक्ति: वाग्रूपैवास्ति।

उत त्व: इति मन्त्रस्य व्याख्यानं कुर्वता भाष्यकारेण अज्ञानां विषयसम्बद्धोऽर्थ एवं प्रकाशितो यत् –अपि खल्वेक: पश्यन्नपि न पश्यति अपि खल्वेक: श्रृण्वन्नपि न श्रृणोत्येनाम्[10] अर्थात् कश्चिदेक: पुरुष: पाठमात्रपर्यवसितो वेदरूपां वाचं पश्यन्नपि एकवचनद्विवचनबहुवचनादिविवेकाभावे पाठशुद्धिरपि कर्तुमशक्यत्वात् तां वाचं सम्यक्तया न पश्यति अन्य: कश्चिदर्थज्ञानाय व्याकरणाङ्गानि श्रृण्वन्नपि मीमांसाराहित्यादेनां न श्रृणोति। शास्त्रज्ञविषयसम्बद्धोऽर्थस्तु यथा सुवासा: पत्ये कामयमाना: स्वात्मानं विवृणुते एवं वाग् वाग्विदे स्वात्मानं विवृणुते[11] इति। अर्थात् य: पुरुषो व्याकरणाद्यङ्गै: स्वशब्दार्थं मीमांसया च तात्पर्यं शोधयितुं समर्थस्तस्मै कस्मैचित् पुरुषाय वेदस्वरूपा भगवती वाक् वेदार्थस्य प्रकाशनं करोति।

**विषयप्रतिपादनम्-**

वाच: पश्यन्तीरूपेण स्थिततत्वात् सा वाग् केनचिदपीन्द्रियेण श्रोत्रेण चक्षुषा वा साक्षात्कर्तुमनर्हा न वा तस्या: साक्षात्कार: अन्तरिन्द्रियेण अर्थात् मनसाऽपि कथमपि भवितुमर्हति इति पूर्वमुक्तम्। तर्हीदानीं प्रश्न: समुत्तिष्ठति यत्तस्या: वाच: कतमं रूपं अस्मादृशैर्जनैर्लभ्यते। अस्य प्रश्नस्य उत्तररूपेण पातञ्जले महाभाष्ये व्याकरणाध्ययनप्रयोजनविववरणावसरे व्याख्यात: "चत्वारि वाक्परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिण:। गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति" इति ऋग्वेदस्य मन्त्र उपस्थायितुं शक्यते। अस्य मन्त्रस्य अर्थ: वाचश्चत्वारो भेदा: भवन्ति तत्र वाचश्चतुर्थो भेदो मानवानां व्यवहारायोपयोगाय भवति। भाष्ये अस्य मन्त्रस्य व्याख्यानमेव वर्तते- चत्वारि पदानि पदजातानि

9. तत्रैव वैयाकरणनागेशभट्टविरचितटीकायाम्

10. महाभाष्ये व्याकरणध्ययनप्रयोजनविवरणावसरे।

11. तत्रैव व्याकरणाध्ययनप्रयोजनविवरणावसरे।

नामाख्यातोपसर्गनिपाताश्चेति[12] इति। तत्र महाभाष्योक्तम् इति पदजातानि वाक्यांशं गृहीत्वा महाभाष्यप्रदीपयो: उद्योतव्याख्यातारो नगेशभट्टा: वदन्ति यत् परापश्यन्तिमध्यमावैखर्य: नामादीनि च, अत एवाग्रे निपाताश्चेति चकार: सङ्गच्छते।[13] अत्रत्यस्य उद्योतस्य तात्पर्यमेतद्भवितुं शक्नोति यत् महाभाष्योक्तौ चत्वारि पदजातानि नामाख्यातोपसर्गनिपातश्च इति पदे समुच्चयार्थं चकारस्य प्रयोग: कृत: स: केषां समुच्चयस्य बोधनं कारयति। यदि नामाख्यातोपसर्गनिपातानां समुच्चयं बोधयति इत्युत्तर्यते तहि अत्र वक्तव्यं भवति एतेषां समुच्चयस्तु द्वन्द्वसमासेनैव बोधितो भवति। उक्तार्थानामप्रयोग: इति नियममनुसृत्य द्वन्द्वसमासेनोक्ते समुच्चये चकारस्य न भवितुमर्हति। निरूक्ते समुच्चयस्य सम्यक्प्रयोग: दृश्यते भाष्ये स कथं नादृत:। तत्र ह्युक्तम्- नामाख्याते चोपसर्गनिपाताश्चेति वैयाकरणा: अत्र प्रथमश्चकार: नामाख्यातयो: समुच्चयं द्योतयति द्वितीयश्चकार: नामाख्याताभ्यां उपसर्गनिपातयो: समुच्चयं बोधयति। किन्तु महाभाष्ये वाक्यरचना भिन्नैवास्ति। निश्चयेनैव भाष्यस्थश्चकारो नामाख्यातोपसर्गनिपातानां समुच्चयं नैव द्योतयति। तर्ह्ययञ्चकार: कान् समुच्चाययति इति जिज्ञासायाम् परापश्यन्तीमध्यमावैखरीणां समुच्चयस्य द्योतकोऽयमस्ति इति नागेशभट्टोक्तेन लभ्यते। तदेवं नागेशभट्टस्य उद्योतदिशा महाभाष्यकारेण परापश्यन्तिमध्यमावैखरीति नाम्ना वाचश्चत्वारो भेदा: सन्तीति लभ्यते, अद्यत्वे वैयाकरणानां नये एतासां चतसृणां सत्ता सर्वैरप्यङ्गीक्रियते। किन्तु अद्यत्वे व्याकरणदर्शनग्रन्थरूपेण सर्वप्राचीनं वाक्यपदीयमेव ग्रन्थरूपेण लभ्यते, यद्यपि तत्सम्पूर्णतया नोपलभ्यते। तत्र नामपूर्वकं संख्यापूर्वकं च वाचस्त्रयाणा भेदानाम् एव चर्चा विद्यते। तद् यथा –

वैखर्या मध्यमायाश्च पश्यन्त्याश्चैतदद्भुतम्। अनेकतीर्थभेदायास्त्रय्या वाच: परं पदम्।[14] अत्र वाक्यपदीये पराया वाच: स्मरणमपि नास्ति। तर्ह्यत्र प्रश्न उदेति यत् वाचो भेदविषये महाभाष्यकारवाक्यपदीयकारयोर्मतभेदोऽस्ति नास्ति वा। यद्यपि चत्वारि वाक्परिमिता पदानि इति मन्त्रस्य व्याख्यानं कुर्वता वेदभाष्यकारेण सायणेनोच्यते – अपरे मातृका: प्रतिपादयन्ति परापश्यन्तीमध्यमावैखरीति[15] इति तेनेदं ज्ञायते यत् निरुक्तानुसारं वैयाकरणानां मते वाचश्चत्वारो भेदा: नामाख्यातोपसर्गनिपातरूपा: सन्ति किन्तु मातृकाणामनुसारं वाचश्चत्वारो भेदा: परापश्यन्तीमध्यमारूपा:

[12]. तत्रैव व्याकरणाध्ययनप्रयोजनविवरणावसरे।

[13]. तत्रैव व्याकरणाध्ययनप्रयोजनविवरणावसरे।

[14] वाक्यपदीयम् -1.142।

[15] चत्वारि वक्परिमिता पदानि इत्यस्य सायणभाष्ये।

© Associationof Academic Researchers and Faculties (AARF)

सन्ति। अनेनेदमायाति यत् महाभाष्यकारेण नामाख्यातोपसर्गनिपाता एव वाचश्चत्वारो भेदा: भवन्ति न तु परापश्यन्तीमध्यमावैखर्योऽपि। किन्तु पूर्ववर्तिनागेशभट्टानुसारं परादयश्चतस्रो वाचो भेदा: भवन्त्येव। नागेशभट्टानुसारमेतदपि लभ्यते यत् वाचश्चत्वारो भेदा: येऽतिप्रसिद्धा: परादयस्सन्ति तासां नामग्रहस्यापि आवश्यकता नास्ति। परन्तु येऽप्रसिद्धा नामाख्यातोपसर्गनिपातरूपभेदा: सन्ति तेषाम् अप्रसिद्धत्वात् तेषां प्रतिपादनम् अत्यावश्यकं भवति।

इदानीं वाचो भेदविषये वाक्यपदीयस्य भावप्रकाशव्याख्याकारेण श्रीसूर्यनारायणशुक्लमहोदयेन-– पश्यन्तीमध्यमावैखरीति त्रिविधैव वाक्। त्रिविधापि सा स्थूला-सूक्ष्मा-परा चेति भेदत्रयेण भिद्यत इति वाचो नव भेदा: सम्पद्यन्ते। वर्णादीनां प्रविभागरहिता स्वरप्रधाना सङ्गीतरुपा स्थूला वाक् पश्यन्ती, जिज्ञासारूपैव सा सूक्ष्मा पश्यन्ती जिज्ञासाहीना संविद्रूपा परा पश्यन्ति। एवं चर्मावनद्धे मृदङ्गादौ करघातादिना समुद्भूता ध्वनिरूपा वाक् स्थूला माध्यमा, विवादयिषारूपा सैव सूक्ष्मा मध्यमा तादृशेच्छारहिता निरुपाधिका सैव परा मध्यमा, एवं परस्परवैलक्षण्यापादनेन स्फुटीकृता वर्णरूपा वाक् सूक्ष्मा वैखरी, विवक्षारूपा सैव सूक्ष्मा विवक्षारहिता परसंविद्रूपा सा परा इति। पश्यन्त्येव सूक्ष्मत्वेन परा वाक् पश्यन्तीमतिक्रान्ता तद्भिन्नरूपा वा सा इति विचारस्तु व्यर्थ एव। सगुणनिर्गुणादिभेदेन परापरभेदेन वा द्विविधतयापि वर्णितस्यापि यथा ब्रह्मणे एकत्वं न विरुद्धम्, तथा एकैव प्रत्यवमर्शिनी वाक् गुणभूमिमतीत्य कदाचित् पश्यन्तीति कदाचित्परेति संज्ञयोपवर्ण्यते। प्राचीनैर्वैयाकरणै: पश्यन्त्येव परा इति स्वीकृतमासीत् अत एव “इत्यहुस्ते परं ब्रह्म यदनादि तथाक्षयम्। तदक्षरं शब्दरूपं सा पश्यन्ती परा हि वाक्।।“ इति शिवदृष्टौ वैयाकरणमतानुवादावसरे पश्यन्त्येव परात्वेनोपवर्णिता। वाचां त्रितये एव मध्यमा वागिति उपपद्यते[16] इत्युक्तम्। एतेन श्रीशुक्लमहोदयानां मतानुसारं पश्यन्ती-मध्यमा-वैखर्य इति वाचस्त्रयो भेदा: सिद्ध्यन्ति। ते च श्रीशुक्लमहोदया: वाचां त्रित्वसमर्थने मध्यस्थाया वाचो मध्यमा इति नामकरणस्य उपयोगितां स्वीकुर्वन्ति।

अत्र रघुनाथशर्म्माणस्तु पश्यन्ती तु परापरा चेति द्विविधा। तत्रापरा प्रतिसंहृतवर्णक्रमा नाभिदेशस्था बुद्धिमात्रग्राह्या बुद्धिमात्रस्वरूपा च सत्यपि ग्राहकबुद्धेरभेदे समाविष्टा समरोपितवर्णक्रमशक्ति:। सा च चलाचला, रूपादिषु विषयेष्ववर्ग्दशनानां विक्षिप्ता बुद्धिरुत्पद्यते। सा च वाग्रूपानिविद्धत्वाद् वागेव। विक्षिप्तत्वाच्च चलाचला। अतिचञ्चला अपरा। सा च यदा प्रतिलब्धसमाधाना भवति प्रतिलब्धं प्राप्तं

---

16 वैखर्या मध्यमायाश्च-इत्यत्र भावप्रकाशव्याख्या।

© Associationof Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

समाधानं समाधिर्यया सा तथाभूता तदा परा योगिनामविक्षिप्ता शब्दपूर्वेण योगेन समाहितत्वात् वैखरीरूपे शब्दे मन: समाधाय पश्यन्तीरूपे शब्दे क्रमेण मनस: समाधानात्। तत्र चलाचला आवृता अविद्या अविद्यया आवृतं यत्क्रमवत्तया भासमानं वाग्रूपं तदनुविद्धरूपादिरूपत्वादपभ्रंशैर्वा समाकीर्णा तैरवष्टब्धा आवृता अपरा। विशुद्धा च परा क्रमादिराहित्यरूपविशुद्धियुक्तपश्यन्तीरूपशब्दात्मकबुद्धिरूपत्वात्। सा च वाग्योविदां ते हि तामक्रमां वाचं वेदयन्ते। अपभ्रंशैर्वा विविक्ता विशुद्धा तां वैयाकरणा वेदयन्ते। एषाऽप्यपरैव। प्रतिलीनाकारा तु परा पश्यन्ती इत्युक्तवान्।[17]

अनेन महाभाष्योक्तिर्व्याख्यायतो वैखरीमध्यमापश्यन्तीनां व्याकरणविषयत्वम् अर्थात् व्याकरणेनान्वाख्येयत्वं हरिसम्मतं प्रतीयते। तत्र वैखर्या वाच: साक्षादन्वाख्यानं,मध्यमापश्यन्त्योस्तु अन्त:सन्निविष्टत्वात्परम्परया अर्थात् वैखरीवाग्द्वारा अन्वाख्यानं भवतीति प्रतीयते। यतो हि या वाक् यदा वक्त्रे स्थिता ताल्विष्ठादिव्यापारेण बहिर्निगच्छति तदा सा वैखरीत्युच्यते। अतोऽस्या: एव व्याकरणेनान्वाख्यानं भवितुमर्हति। अथ या मूलाधाराधिष्ठाना सा परेत्युच्यते। नादस्य दुर्निरूपत्वात् सैव नाभिदेशमागत्य सती पश्यन्तीत्युच्यते। सैव वृद्धिं गता विवक्षां प्राप्ता मध्यमेत्युच्यते मध्ये अर्थात् हृदयदेशे स्थितत्वादस्या एतदन्वर्थकन्नाम् सुतरां सङ्गच्छते।

**परा वाक्** - इदानीं एतासां वाचां स्वरूपादिविषये उच्यते। महाभाष्ये पस्पशायां “चत्वारि शृङ्गा त्रयोऽस्य पादा: द्वे शीर्षे सप्तहस्तासोऽस्य। त्रिधा बद्धो वृषभो रोरवीति महोदेवो मर्त्यां आविवेश” इति ऋङ्मन्त्रं व्याख्यायता महाभाष्यकारेण निगदितं यत् महान् देव: शब्दो मर्त्यान् मरणधर्माणो मनुष्यान् आविवेशे[18]ति स च उरसि कण्ठे शिरसीति त्रिषु स्थानेषु बद्ध:। अत्र महान् देव: इत्यस्य विवरणं प्रदीपोद्योते नागेश: अन्तर्यामिरूप: शब्दो मर्त्यान् आविवेश स्वाभेदमाविष्कृतवान् इति मन्त्रतात्पर्यम्[19] इत्यवोचत्। एषैव परा वागिति। तत्र यश्चोरसि स्थित: स मूलाधारे स्थित: बन्धनरहित: शुद्ध: साक्षीचेत:केवलो निर्गुणश्च परापदवाच्यो भवति। स च सर्वचेतन: सर्वजगदुपादानकारणं नानाशक्तिव्यपाश्रयो ववर्त्युपादानकारणं भवतीति बोध्यम्। पाणिनीकात्यायनपतञ्जलीति त्रयाणां मुनीनामनन्तरं व्याकरणशास्त्रस्य सर्वमान्य आचार्यो वाक्यपदीयकारोऽपि “अनादिनिधनं ब्रह्म शब्दतत्त्वं यदक्षरम्। विवर्ततेऽर्थभावेन प्रकृया जगतो

---

[17] वैखर्या मध्यमायाश्च-इत्यत्र अम्बाकर्त्र्याम्।

[18] महाभाष्ये व्याकरणध्ययनप्रयोजनविवरणावसरे।

[19] महाभाष्ये व्याकरणध्ययनप्रयोजनकथने प्रदीपोद्योते।

यत:"[20] कारिकया शब्दब्रह्मणस्तटस्थलक्षणं[21] वदति। अत्र लक्षणे पराया वाच: स्वरूपमपि अन्तर्भूतमिव दृश्यते। सा च चिद्रूपा सर्वत: संहृतक्रमा सर्वग्राहकाकारवर्जिता अपरिच्छिन्ना परावाग्ब्रह्मरूपेण प्रतिपादिता। सा च निरवयवा अगुणाऽरूपा स्वयम्प्रकाशा च विद्यते। हरिवृषभवृत्तौ च "सोऽव्यतिकीर्णा वागवस्थामधिगम्य वाग्विकाराणां प्रकृतिं प्रतिभामनुपरैति। तस्माच्च प्रतिभाख्यात् शब्दपूर्वकयोगभावनाभासाक्षेपात् प्रत्यस्मित सर्वविकारोल्लेखमात्रां परां प्रकृतिं प्रतिपद्यते"[22]इत्याह। श्रीमद्भागवते च "स एव जीवो विवरप्रसूति प्रणेन घोषेण गुहां प्रविष्ट:। मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरा वर्ण स्थविष्ट॥"[23] इति श्लोकेन पराया: वाच: सर्वकारणत्वमुक्तम्। सा च सजातीयविजातीयस्वगतभेदशून्या नानाशक्तिसम्पन्ना प्रणवरूपाशक्त्याश्रयेण ऋग्यजु:सामाथर्वरूपेण कार्यभेदमाश्रित्य पश्यन्तीनाम्ना व्यवहृयते। एनां परां वाचं किमपि प्रकाशान्तरं न प्रकाशयति अपितु तस्या एव प्रकाशेन सर्वमिदं जगत् प्रकाशितं भवति। यथा ह्युक्तं वाक्यपदीये –"वाग्रूपता चेदुत्कामेदवबोधस्य शाश्वती न प्रकाश: प्रकाशेत सा हि प्रत्यवमर्शिनी" ज्ञानस्य हि वाक् रूपम् यथाग्ने: प्रकाशकत्वम् अन्तर्यामिणश्च चैतन्यं रूपम्। यदा प्रकाशस्य प्रकाशकत्वं निष्क्रान्तं भवेत्, अन्तर्यामिणश्च चैतन्यमुत्सृज्येत् तदैतौ नैव स्याताम्, एवमेव ज्ञानस्य वाग्रूपतायां निष्क्रान्तायां ज्ञानमपि तन्न भविष्यति। श्रीकरपात्रस्वामिभिरपि वेदस्वरूपविमर्शाख्ये ग्रन्थे उक्तं यत् – पश्यन्त्यादिभेदभिन्ना त्रिविधा वाक् स्थूला सूक्ष्मा परा चेति अवान्तरभेदमुपेत्य यदा नवधा सम्पद्यते तदा परा वाक् दशमी व्याख्यायते।[24]

**पश्यन्ती वाक् -** महाभाष्ये चत्वारि श्रृङ्गेत्यादि मन्त्रस्य व्याख्यावसरे भाष्यकारेण "त्रिधा बद्धो वृषभो रोरवीति महो देवो मार्त्याँ आविवेश "[25] इत्युक्त्वा उरसि कण्ठे शिरसीति त्रिषु स्थानेषु बद्धो महान् देव: शब्दं करोति इत्युक्तम्। अत्र यस्य देवस्य उर:स्थानमुक्तम् स देव एव पश्यन्ती वाग् रूपेण अभीष्ट:। सा च पश्यन्ती भेदक्रमादिरहिता स्वयम्प्रकाशा संविद्रूपा अस्ति। परापश्यन्त्योश्च मध्येऽतीव साङ्कर्यमुपलभ्यते। किन्तु तयोर्मध्येऽहङ्कार एव प्रायेण भेदकं तत्त्वमस्ति। वाक्यपदीये ब्रह्मकाण्डे –विवर्ततेऽर्थभावेन प्रक्रिया

---

20 वा.प. ब्रह्मकाण्डे-१.१।

21 कादाचित्कत्वे सतीतरव्यावर्तकत्वं तटस्थलक्षणम्।

22 वा.प. ब्रह्मकाण्डे- स्वोपज्ञवृत्तौ १.१४।

23 श्रीमद्भागवते -१.१२.७०।

24 वेदस्वरूपविमर्शे-पृष्ठम्- १५४१।

25 महाभाष्ये व्याकरणध्ययनप्रयोजनविवरणावसरे।

© Associationof Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

जगतो यत:[26] इति कारिकया परास्वरूपमुक्तवान्। तस्या: प्रथमो विवर्तो नित्यशब्दार्थसम्बन्धरूप: पश्यन्तीवाक्पदव्यवहार्यो वर्तते। तस्या: पश्यन्त्या: विवर्त: स्वरूपतो विद्यमानाश्चत्वारो वेदा: वर्तन्ते। पुनस्तेषां वेदानां शाब्दिको विवर्तश्चतुर्दशविद्या: आर्थिको विवर्तस्तु महभूता:। अत्र विवर्तपदेन उपादानविषमसत्ताककार्यापत्तिरूप: ग्राह्य:। उक्तं च वाक्यपदीये –" छन्दोभ्य एव प्रथममेतद्विश्वं व्यवर्तत"[27] अर्थ उपयाञ्च्यायाम् इत्यस्माद्धतो: अर्थ्यते उपयाच्यतेऽसौ इति विग्रहे कर्मण्यर्थे अण्प्रत्ययेन अर्थशब्द: सम्पन्न:,अथ च भू धातोश्च अधिकरणे घञ्प्रत्ययेन भवन्ति उत्पद्यन्ते पदार्था: अत्रासौ इत्यस्मिन्नर्थे भावशब्दश्च निष्पद्यते। तद्यत्र इदमपि ध्यातव्यं भवति यद् परिणामानन्तरमेव शबोऽर्थश्च पृथग्पृथगवभासेते। श्रीकरपात्रचरणैस्तु –" अविभागात् तु पश्यन्ती सर्वत: संहृतक्रमा। स्वरूपज्योतिरेवान्त: सूक्ष्मा वागनपायिनी"[28] अर्थात् अविभागात् विभागस्यात्यन्ताभाववत्वात् अवयवराहित्यादित्यर्थ: सर्वत: संहृतक्रमा क्रमविवर्जिता अर्थात् वर्णपदवाक्यविभागशून्या स्वरूपज्योतिरन्त: सूक्ष्मा अनपायिनी वागेव पश्यन्तीपदवाच्या भवतीत्युक्तम्।[29]

**मध्यमा वाक्** – महाभाष्ये भाष्यकारो "तपरस्तत्कालस्य"[30]इति सूत्रे भाष्ये एवं तर्हि स्फोट: शब्द: ध्वनि: शब्दगुण:[31] इत्युक्तवान्। अत्र शब्दगुण: इत्यस्य शब्दस्य गुण अर्थात् व्यञ्जको प्रकाशक: इति तात्पर्यम्। अत्र शब्दगुण इति कथनेन पस्पशायां "येनोच्चारितेन सास्नालाङ्गूलककुदखुरविषाणिनां सम्प्रत्ययो भवति स शब्द" इति निश्चितम्। स एव ध्वनिव्यङ्ग्य: एको नित्योऽर्थस्य वाचक: शब्द: स्फोटपदवाच्य:। स एव स्फोटो मध्यमा वागुच्यते। तदेवाह श्रीनागेशभट्ट:- स्फोटपदेनाभिव्यक्तकत्वादिको मध्यमावस्थाअन्तर: शब्द उच्यते[32] इत्याह।

वाक्यपदीयेऽपि– ''वैखर्या मध्यमायाश्च पश्यन्त्यास्चैतदद्भुतम्" इत्यस्यां कारिकायां वैखरीमध्यमापश्यन्तीवाचां स्वरूपादिज्ञानायेदं व्याकरणशास्त्रम् अद्भुतं स्थानं वर्तते इत्युक्तम्। मध्यमा वाक्

---

[26] वा.प. ब्रह्मकाण्डे-१.१।

[27] वा.प. ब्रह्मकाण्डे-१.१२०।

[28] वेदस्वरूपविमर्शे-पृष्ठम्- १२९।

[29] तत्रैव।

[30] म.भा.पा.सू. १.१.७०।

[31] तत्रैव महाभाष्ये।

[32] वा.प. ब्रह्मकाण्डे- स्वोपज्ञवृत्तौ १.१४२।

© Associationof Academic Researchers and Faculties (AARF)
A Monthly Double-Blind Peer Reviewed Refereed Open Access International e-Journal - Included in the International Serial Directories.

का इति जिज्ञासायाम् वक्यपदीयस्य स्विपज्ञवृत्तौ उल्लिखितं यत् "अन्त:सन्निवेशिनी परिगृहीतक्रमा इव बुद्धिमात्रोपादाना सा तु सूक्ष्मप्राणवृत्यनुगता क्रमसंहारभावेऽपि व्यक्तक्रमपरिग्रहैव केषाञ्चित्"[33] इत्युक्तम्। किञ्च "केवलं बुद्ध्युपादाना क्रमरूपानुपातिनी। प्राणवित्तिमतिक्रम्य मध्यमा वाक् प्रवर्तते" अर्थात् अन्त:सङ्कल्प्यमाना क्रमयुक्ता श्रोत्रग्राह्यवर्णादिरूपाभिव्यक्तिरहिता या वाक् सैव मध्यमापदवाच्या भवति। अत्र स्थूलप्राणवृत्तिं कारणरूपेण अनपेक्ष्य केवलं बुद्धेरेवोपादानं हेतुर्यस्या सा प्राणस्थत्वात् क्रमरूपमनुपतति। वैखरीपश्यन्त्योर्मध्ये भवा मध्यमा वाक् इति।

**वैखरी वाक्-** महाभाष्यस्य गौणप्रयोजननिरूपणप्रसङ्गे तुरीयं वाचो मनुष्या वदन्ति इत्युक्तं[34] भाष्यकृता। तुरीयं चतुर्थमिति। यद्वन्ति जना: सा एव वैखरी परश्रवणगोचरा ध्वनिरूपा स्फोटस्य व्यञ्जिका अप्यस्ति। लोकव्यवहारे ततोऽपि बोधो दृश्यते इति प्रतिपादयन् भाष्यकारो अब्रवीत्- "प्रतीतिपदार्थको लोके ध्वनि: शब्द इत्युच्यते।....तस्माद्ध्वनि: शब्द: इति[35]"अत्र ध्वनिपदेन वैखरीवागेव गृहीतास्ति। ध्वनेरर्थबोधकता अपि आपातरमणीया लौकिकनां तादृशस्यैव शास्त्रेण प्रतिपादनात्। ह्रस्वादिभेदा अपि वैखर्यामेव संभवन्ति न तु मध्यमायाम् तस्या बुद्धिस्थत्वेन अखण्डत्वात्। स्वयं महाभाष्यकारो वदति- सिद्धं त्ववस्थिता वर्णा वक्तुश्चिरचिरवचनाद् वृत्तयो विशिष्यन्ते इति। वाक्यपदीयकारस्य मतेन अर्थबुभुत्सया उच्चारितं शब्दमेव वैखरि वाक्पदेन व्यवह्रियते। यथा चोक्तम् वाक्यपदीये– अपरोऽर्थे प्रयुज्यते[36] इति। शब्देति शब्दस्य सामान्यपरत्वा नदीघोषतन्त्रीशब्दकाकवाशितादौ अव्यक्तवर्णामत्केषु स्वेषु ध्वनिषु अथ च व्यवहर्तृषु अर्थबोधकत्वेन च प्रसिद्धे श्रवणेन्द्रियग्राह्यध्वनौ च वैखर्या व्याप्तिरस्ति तथापि व्याकरणेन लौकिकवैदिकोभयशब्दानामनुशासनप्रसङ्गात् श्रीमद्भर्तृहरिणा अनुशासनकर्मीभूत: तपरसूत्रभाष्योक्त: स्फोट: शब्द ध्वनि: शब्दगुण: इतिलक्षणलक्षितस्य स्फोटस्याभिव्यञ्जकस्य ध्वनिरूपशब्दस्य एवं ग्रहणम् भवतीति बोध्यम्।

**उपसंहार:-** "न सोऽस्ति प्रत्ययो लोके य: शब्दानुगमादृते अनुविद्धमिवज्ञानं सर्वं शब्देन भासते" इति वाक्यपदीयानुसारं लोकव्यवहारे यत्किमपि ज्ञानमस्ति तत्सर्वं शब्दानुविद्धमेवास्ति।

---

[33] तत्रैव।

[34] महाभाष्ये व्याकरणध्ययनप्रयोजनविवरणावसरे।

[35] महाभाष्ये शब्दस्वरूपकथनावसरे।

[36] वा.प. ब्रह्मकाण्डे-१.४४।

© Associationof Academic Researchers and Faculties (AARF)

निद्राबुभुक्षाभयोद्वेगाद्यन्त:करणसंवेद्यमपि ज्ञानमेव प्रीत्यनुभूत्यादिशब्दवच्यतामेति। एतच्च ज्ञानं सदर्थविषयकम् अत्यन्तासदर्थविषयकं सदसदर्थविषयकमिति त्रिधा विभक्तमस्ति। पुनश्च वक्तृश्रोतृबुद्धिविषयत्वेन द्विधा विभक्तमस्ति। च्च ज्ञानं शब्दानुविद्धं भूत्वा प्रतीष्ठामाप्नोति प्रकाश्यताञ्च याति। शब्द एव ओष्ठताल्वादिकरणैर्यदा प्रकश्यतां याति तदा स एव वागिति पदेन व्यवह्रियते। व्याकरणशास्त्रे चत्वारि श्रृङ्गा इत्यादि मन्त्रस्य पातञ्जलमहाभाष्यीयव्याख्यालोके वैखर्या मध्यमायाश्च इत्यादिकारिकालोके सन्देहदवीं याति यत् वाचश्चत्वारो भेदा भवन्तीति उत वा त्रयो भेदा: भवन्ति। अत्र पश्यन्तीमध्यमावैर्य इति तिस्रो वाच: व्याकरणेनाख्येया सन्तीत्यर्थे वाक्यपदीयकारस्य मतमस्तीति अनूदितम्। परा तु चिद्रूपत्वात् सर्वतसंहतक्रमत्वात् सर्वग्राहकाकारवर्जितत्वाच्च व्याकरणेनान्वात् शब्दशास्त्रविषयतां नार्हतीति भर्तृहरे: प्रतिपादितम् न तु परा नैवास्तीति धिया वैखर्यामध्यमायाश्च इति वाक्यपदीयकारिकाया तात्पर्यं पर्यवसितमिति स्थापितम्।